**CLASS : 10th (Secondary)** **Code No. 1908**

**Series : Sec. M/2017**

रोल नं० | | | | | | | | | | |

***SET : C***

# संस्कृत

*(Academic/Open)*

(Only for Fresh Candidates)

**शेमुषी (नई पुस्तक)**

**(Morning Session)**

*समय : **3** घण्टे ]* *[ पूर्णांक : **80***

- *कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित प्रश्न **16** हैं।*
- *प्रश्न-पत्र में दाहिने हाथ की ओर दिये गये **कोड नम्बर** तथा **सेट** को छात्र उत्तर-पुस्तिका के मुख्य-पृष्ठ पर लिखें।*
- *कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें।*
- *उत्तर-पुस्तिका के बीच में खाली पन्ना/पन्ने न छोड़ें।*
- *उत्तर-पुस्तिका के अतिरिक्त कोई अन्य शीट नहीं मिलेगी। अतः आवश्यकतानुसार ही लिखें और लिखा उत्तर न काटें।*
- *परीक्षार्थी अपना रोल नं० प्रश्न-पत्र पर अवश्य लिखें।*
- *कृपया प्रश्नों का उत्तर देने से पूर्व यह सुनिश्चित कर लें कि प्रश्न-पत्र पूर्ण व सही है, **परीक्षा के उपरान्त इस सम्बन्ध में कोई भी दावा स्वीकार नहीं किया जायेगा।***

*निर्देश :*

*(i) प्रत्येकं खण्डम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

*(ii) प्रश्नसंख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।*

*(iii) श्रेष्ठाङ्कान् प्राप्तये सुवाच्यलेखोऽपेक्ष्यते।*

**खण्डः 'क'**

**(अपठित–अवबोधनम्)**

**1.** अधोलिखितं गद्यांशं पठित्वा एतदाधारितानां प्रश्नानाम् उत्तराणि संस्कृतपूर्णवाक्येन लिखत — 4 × 2 = 8

अस्मिन् वैज्ञानिके युगे समाचारपत्रस्य महत्त्वपूर्णं स्थानं वर्तते। प्रातरेव प्रत्येकं जनं समाचारपत्रं द्रष्टुम् उत्सुकः जायते। सः ज्ञातुमिच्छति यत् अस्माकं देशे-विदेशे च काः मुख्य-घटनाः घटिताः। मनुष्यः सामाजिकः प्राणी अस्ति। स समाजस्य दशां घटनाक्रमं च ज्ञातुम् उत्सुकः भवति। समाचारपत्रम् अस्य जिज्ञासां पूरयति।

*प्रश्नाः*

(क) अस्मिन् युगे कस्य महत्त्वपूर्णं स्थानं विद्यते ?

(ख) समाचारपत्रेण मानवः किं ज्ञातुमिच्छति ?

(ग) मनुष्यः कीदृक् प्राणी अस्ति ?

(घ) मनुष्यस्य जिज्ञासां कः पूरयति ?

**खण्डः 'ख'**

**(रचनात्मकं–कार्यम्)**

**2.** (क) स्वमित्रं विद्यालयस्य वार्षिकोत्सव विषये लिखितं प्रदत्तपत्रं पठित्वा मञ्जूषातः पदानि चित्वा पूरयित्वा च उत्तर-पुस्तिकायां लिखत —

4 × 1 = 4

परीक्षाभवनम्

तिथिः

प्रिय मित्र रमेश !

नमस्ते।

अत्र कुशलम् (i) ..........। अहं स्वविद्यालयस्य (ii) .......... वर्णयामि। उत्सवस्यावसरे अस्माकं विद्यालयः (iii) .......... भूषितः आसीत्। शिक्षानिदेशकः कार्यक्रमस्य (iv) .......... आसीत्। स कार्यक्रमं अतीव प्रांशसत।

गृहे सर्वेभ्यो मम प्रणामाः।

भवतः मित्रम्

क ख ग

**मञ्जूषा**

| मुख्यातिथिः, वार्षिकोत्सवम्, तत्रास्तु, वधूरिव। |
|---|

(ख) निर्दिष्टं चित्रं दृष्ट्वा प्रदत्तवाक्यानि पठित्वा च मञ्जूषाप्रदत्तैः उचितपदैः रिक्तस्थानानि पूरयित्वा लिखत — 4 × 1 = 4



*प्रश्नाः*

(i) अस्मिन् ........... एकः द्रुमः अवशिष्टः।

(ii) ........... द्रुमाः तु काष्ठकारैः छिन्नाः।

(iii) राजमार्गे धूमं ........... एकं कारयानम् गच्छति।

(iv) वृक्षाणां संरक्षणेन एव पर्यावरणम् ...........।

**मञ्जूषा**

| क्षिपत्, चित्रे, रक्षणीयम्, अन्ये। |
|---|

**खण्डः 'ग'**
**(पठित–अवबोधनम्)**

**3.** अधोनिर्दिष्टस्य गद्यांशस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

$1 \times 4 = 4$

यां कामपि लक्षणवतीं कन्यां विलोक्य स पृच्छति – भद्रे ! शक्नोषि किमनेन शालिप्रस्थेन गुणवदन्नम् अस्मान् भोजयितुम् ? एवं कृते स हसितावधूतः गृहात् गृहं प्रविश्याभ्रमत्।

**अथवा**

विदूषकः – एतयोर्यदि पितुर्निरनुक्रोश इति नामधेयम् एतयोर्जननी तेनावमानिता निर्वासिता एतेन वचनेन दारकौ निर्भर्त्सयति।

**4.** अधोनिर्दिष्टस्य श्लोकस्य हिन्दीभाषायां सरलार्थः लेखनीयः –

$1 \times 4 = 4$

व्यायामं कुर्वतो नित्यं विरुद्धमपि भोजनम्।
विदग्धमविदग्धं वा निर्दोषं परिपच्यते।।

**अथवा**

निमित्तं उद्दिश्य हि यः प्रकुप्यति,
ध्रुवं स तस्यापगमे प्रसीदति।
अकारणद्वेषि मनस्तु यस्य वै,
कथं जनस्तं परितोषयिष्यति।।

**5.** अधोलिखितसूक्तिषु ***द्वयोः*** भावार्थः स्पष्टनीयं – 2 × 2 = 4

(क) युष्मद्दर्शनात् कुशलमिव।

(ख) प्राणेभ्यो अपि प्रियः सुहृद्।

(ग) संपत्तौ च विपत्तौ च महतामेकरूपता।

(घ) जीवनं विभवं विना।

**6.** अधः प्रदत्तं गद्यांशं पठित्वा निर्दिष्टप्रश्नानाम् उत्तराणि संस्कृतेन लेखितव्यानि – 3 × 1 = 3

एकदा स कावेरीतीरपत्तने विगलितसमृद्धिं विरलभूषणां कुमारीमपश्यत्। तस्या अतुलितरूपसम्पदाभिभूतः शक्तिकुमारो अचिन्तयत् – सेयमाकृतिर्न शीलविरोधिनी आसज्जति मे हृदयमस्यामेव। तदेनां परीक्ष्योद्वहामि।

(क) विरलाभूषणा का आसीत् ?

(ख) शक्तिकुमारः कुमारीं कुत्र अपश्यत् ?

(ग) सा आकृति कीदृशी न आसीत् ?

**7.** अधः प्रदत्तं श्लोकं पठित्वा प्रदत्तप्रश्नयोः संस्कृतेन उत्तरे लेखितव्ये –

2 × 1 = 2

सेवितव्यो महावृक्षः फलच्छायासमन्वितः।

यदि दैवात् फलं नास्ति छाया केन निवार्यते।।

(क) कीदृशः महावृक्षः सेवितव्यः ?

(ख) का न निवार्यते ?

**8.** रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – 3 × 1 = 3

(क) सा कन्या अतिथिं स्नानाय प्रेरितवती।

(ख) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते।

(ग) शरीरस्य आयासजननं कर्म व्यायामः इति कथ्यते।

**9.** प्रश्नपत्रे लिखितान् श्लोकान् विहाय "शेमुषी भाग-2" स्वपाठ्य-पुस्तकात् ***एकं श्लोकं*** संस्कृतभाषायां लिखत। 1 × 4 = 4

**खण्डः 'घ'**

**(अनुप्रयुक्त–व्याकरणम्)**

**10.** (क) अयादिसन्धेः अथवा व्यञ्जनसन्धेः परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 1 × 2 = 2

(ख) द्विगुसमासस्य अथवा अव्ययीभावसमासस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 1 × 2 = 2

(ग) करणकारकस्य अथवा अपादानकारकस्य परिभाषां सोदाहरणं हिन्दीभाषायां लिखत। 1 × 2 = 2

**11.** अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत –

$3 \times 1 = 3$

(क) कृपया ............. वदतु। (पुनः, कुत्र)

(ख) त्वं प्रातः ............. गच्छसि। (विद्यालयं, कुत्र)

(ग) ............. कुशली भवान् ? (मिथ्या, अपि)

**12.** प्रदत्तोपपदविभक्ति-वाक्येषु उचित विभक्ति प्रयोगं कुरुत –

$4 \times 1 = 4$

(क) पिता ............. कुप्यति। (पुत्रं, पुत्राय)

(ख) पिता ............. सह गच्छति। (पुत्रात्, पुत्रेण)

(ग) ............. विना न जीवनम्। (धनस्य, धनं)

(घ) स ............. अन्धः। (नेत्राभ्याम्, नेत्रेण)

**13.** यथानिर्दिष्टं शब्दरूपाणि लिखत – $4 \times 1 = 4$

(क) 'बालक' शब्दस्य सप्तमी बहुवचने।

(ख) 'मुनि' शब्दस्य चतुर्थी एकवचने।

(ग) 'कन्या' शब्दस्य तृतीया बहुवचने।

(घ) 'तद्' शब्दस्य स्त्रीलिंग पंचमी द्विवचने।

**14.** यथानिर्दिष्टं धातुरूपाणि लिखत – $4 \times 1 = 4$

(क) 'भू' लृट्लकार, म० पु०, द्विवचने।

(ख) 'पठ्' लोट्लकार, उ० पु०, बहुवचने।

(ग) 'पा' (पिब्) लट्लकार, प्र० पु०, एकवचने।

(घ) 'गम्' विधिलिङ्, म० पु०, द्विवचने।

**15.** अधोलिखितेभ्यः क्रियापदेभ्यः उपसर्गान् पृथक् कृत्वा लिखत –

$3 \times 1 = 3$

(क) अवनयति।

(ख) अधिगच्छति।

(ग) प्रतिवसति।

**खण्डः 'ङ'**

**(बहुविकल्पीय प्रश्नाः)**

**16.** अधोनिर्दिष्टेषु प्रश्नेषु प्रदत्त वैकल्पिक चतुर्षु उत्तरेषु ***एकं*** शुद्धम् उत्तरं लिखत – $16 \times 1 = 16$

(क) 'सु + आगतम्' अत्र किं सन्धियुक्तपदम् ?

(i) सुवागतम्

(ii) स्वागतम्

(iii) सुआगतम्

(iv) सवागतम्

(ख) 'परीक्षितुम्' पदे कः सन्धिविच्छेदः ?

(i) परी + ईक्षितुम्

(ii) परी + क्षितुम्

(iii) परि + क्षितुम्

(iv) परि + ईक्षितुम्

(ग) 'अहर्निशम्' इति पदस्य किं विग्रहम् ?

(i) अहः च निशा च

(ii) अहनि निशा

(iii) अह निशम्

(iv) अहनि अहनि

(घ) 'दशाननः' इति पदे कः समासः ?

(i) द्विगु

(ii) बहुव्रीहिः

(iii) अव्ययीभाव

(iv) तत्पुरुषः

(ङ) 'सुलभः' इति पदस्य विलोमशब्दः ?

(i) सुकरः

(ii) सुखदः

(iii) दुर्लभः

(iv) दुर्लभा

(च) 'सम्पत्तौ' इति पदस्य विलोमशब्दः ?

(i) विपत्तौ

(ii) विपदा

(iii) विपती

(iv) विपदी

(छ) 'शीघ्रम' इति पदस्य पर्यायपदम् ?

(i) यासि

(ii) गच्छसि

(iii) सत्वरम्

(iv) अवसि

(ज) 'पत्तनम्' इति पदस्य पर्यायपदम् ?

(i) वनम्

(ii) नगरम्

(iii) उपवनम्

(iv) काननम्

(झ) 'समाज + ठक्' इति संयोगे किं रूपम् ?

(i) समाजी

(ii) समाजठक्

(iii) सामाजिक

(iv) सामाजिकः

(ञ) 'छदत्वम्' इति पदे कः प्रत्ययः ?

(i) त्व

(ii) कत्वा

(iii) तव्यत्

(iv) अनीयर्

(ट) 'पंचविंशति' इति पदे का संख्या ?

(i) 35

(ii) 45

(iii) 25

(iv) 55

(ठ) '49' इति अंके किं संख्यावाचीपदम् ?

(i) चतुर्दश

(ii) त्रयोदशः

(iii) चतुर्विंशति

(iv) नवचत्वारिंशत्

(ड) 'हृदयग्राही स्पर्शः' अत्र किं विशेष्यपदम् ?

(i) हृदय

(ii) ग्राही

(iii) हृदयग्राही

(iv) स्पर्शः

(ढ) 'कुमारयोः' कुशलवयोः अनयोः पदयोः किं विशेषणम् ?

(i) कुश

(ii) लवयोः

(iii) कुमारयोः

(iv) कुशलवयोः

(ण) घटिकां दृष्ट्वा समयेन रिक्तस्थानं संस्कृतपदेन पूरयत –

(i) रामः प्रातः ............ उत्तिष्ठति।




(ii) रमेशः ............. विद्यालयं गच्छति।

